**अध्ययनसामग्री**
**कक्षा-दशमी**
**संस्कृत पाठ्य-सामग्री (मणिका द्वितीय भाग)**
**सत्र- २००८-०९**

संरक्षक- **श्री उदय नारायण खवाड़े**
सहायक आयुक्त, के.वि.सं., गुवाहाटी-संभाग

निदेशक- **श्री एस. के. वर्मा**
शिक्षाधिकारी, गुवाहाटी संभाग

मुख्य सम्पादक- **श्री मणियप्पन पी. पी.**
प्राचार्य, के.वि. मालीगाँव

समन्वयक- **डाँ० त्रिवेणी प्रसाद शुक्ल**
उप प्राचार्य, के. वि. मालीगाँव

**पाठ्यसामग्री निर्माण समिति**

| | |
|---|---|
| १. श्री प्रमोद पासवान | प्र० स्नातक शिक्षक, (संस्कृत)<br>के.वि. मालीगाँव, गुवाहाटी |
| २. डाँ आर. के. झा | प्र० स्नातक शिक्षक, (संस्कृत)<br>के.वि. आई.आई.टी., गुवाहाटी |
| ३. श्री घनश्याम शर्मा | प्र० स्नातक शिक्षक, (संस्कृत)<br>के.वि. मंगलदै |
| ५. श्रीमती एस. चौधरी | प्र० स्नातक शिक्षिका, (संस्कृत)<br>के.वि. आई.ओ.सी., नुनमाटी, गुवाहाटी |
| ६. श्रीमती बुलबुली | प्र० स्नातक शिक्षिका, (संस्कृत)<br>के.वि. डिगारू |

# आमुख

संस्कृत विश्व की प्राचीनतम देवभाषा मानी जाती है। भारत का गौरव, संस्कृति एवं इतिहास इसी भाषा में विद्यमान है। संस्कृत भाषा में ज्ञान-विज्ञान का अमूल्य भण्डार भी समाहित है। अतः इस भाषा की महत्ता को अस्वीकार करना, किसी भी परिस्थिति में उचित नहीं है।

संस्कृत भाषा के प्रति अभिरूचि उत्पन्न इसके लिए आवश्यक है कि इसे सर्वसुलभ एवं स र्वग्राह्य बताया जाय। माध्यमिक स्तर पर इसे लोकप्रिय बनाने के लिए शिक्षक प्रयत्नशील रहें एवं परीक्षा में अच्छे अंक की प्राप्ति छात्र-छात्राओं को हो इसके लिए ही अध्ययन सामग्री का निर्माण किया गया है। आशा है यह छात्र-छात्राओं एवं अभिभावकों के लिए उपयोगी सिद्ध होगी। शिक्षक मित्र इसे स्व प्रयास मैंनकर अपनाएँगे इसी आशा के साथ।

**कक्षा १०**

**(संस्कृत)**

# अध्ययन-सामग्री

## विषय सूची


१. अपठितावबोधनम्

२. रचनात्मकं कार्यय

३. अनुप्रयुक्तं व्याकरणम्

४. मणिका भाग द्वितीय पाठ्यसामग्री

५. पठितावबोधनम्

# अपठितावबोधनम्

प्राचीनकाले भारद्वाज नामकः मुनिः प्रतिवसति स्म। सः अतीव मेधावी विद्यावान् च आसीत्। सः एकेन वैज्ञानिका.विष्कारक-रूपेण सुविख्यातः आसीत्। तस्मिन् समये यदा ऋषीणां मध्ये विवादः भवति स्म तदा ते ऋषयः तेषां सामीप्यं प्राप्य संशयरहिताः भवन्ति स्म। तेन यद्यपि त्रिशतवर्षपर्यन्त वैज्ञानिकानुसन्धानं कृतं परं सम्प्रति तेषां यन्त्रसर्वस्वनामकः एकएव ग्रन्थः उपलह्धः अस्ति। अस्ति। अस्य ग्रन्थस्य एकः भागः वृहत् विमानशास्त्रनाम्ना ख्यातः अस्ति। अस्य ग्रन्थस्य पठनेन तत्कालीन-वैज्ञानिकप्रगतेः महर्षिभारद्वाजस्य च महतवं प्रकटीभूतं भवति।

१. एकपदेन उत्तरत-

(क) ऋषेः नाम किम् आसीत्?

(ख) भारद्वाजमुनेः कः ग्रन्थः उपलब्ध अस्ति?

(ग) 'बृहद्विमानशास्त्रम्' कस्य ग्रन्थस्य अंशः अस्ति?

(घ) ऋषयः किं कृत्वा संशयरहिता भवन्ति स्म?

२. पूर्णवाक्येन उत्तरत

(क) 'यन्त्रसर्वस्वम्' इति ग्रन्थस्य पठनेन किं प्रकटीभूतं भवति?

(ख) भारद्वाज-ऋषेः कीदृशी प्रसिद्धिः आसीत्?

३. निर्देशानुसारेण उत्तरत

(क) 'संशयरहिताः' इति पदस्य समासविग्रहं कुरुत।

(ख) 'वैज्ञानिकानुसन्धानम्' इति पदस्य सन्धिविच्छेदं कुरुत।

मनुष्यः यस्मिन् परिवेशे निवसति तस्य व्यक्तितम् अपि तथैव भवति। सज्जनानां सङ्गे मनुष्यः दुर्जनः भवति। एकः शुकः यदि दुष्टैः सह वसति तदा सः दुर्वचनमेव वदति परं यद् सः सज्जनैः वसति तदा सद्वचनं एव वदिष्यति। अत एव ज्ञायते यत् दोषाः गुणाः च संसर्गजाः एव सन्ति। गङ्गायाः जलम्आस्वाद्यम् भवति परं समुद्रे पतनानन्तरं तत् जलं अपि अपेयं भवति। सज्जनानां संसर्गः अनिवार्यः भवति।

उक्तं च-

''सद्भिरेव सहासीत सद्भिः कुर्वीत संगतिम्।''

१. एकपतेन उत्तरत

(क) केषां सङ्गे मनुष्यः सज्जनः भवति?

(ख) सज्जनानां कः अनिवार्यः ?
(ग) दोषाः गुणाः च कस्य सन्ति?
(घ) समुद्रे पतनानन्तरं जलं कीदृशः भवति?

२. पूर्णवाक्येन उत्तरत
(क) सज्जनैः सह निवसमानः जनः कीदृशः भवति?
(ख) सत्संगति-विषये किमुक्तम् अस्ति?

३. निर्देशानुसारेण उत्तर
(क) 'पतनानन्तरं' इति पदस्य सन्धि विच्छेदं कुरुत।
(ख) 'दुष्टैः' इति पदे का विभक्तिः।

गंगानदी भारतस्य प्राणवाहिनी नदी अस्ति। एषा नदी हिमालयस्य गंगोत्री स्थानात् प्रभ वति। उद्‌गमस्थले अस्याः नाम भागीरथी भवति। देवप्रयागनामके स्थले यदा भागीरथी अ लकनन्दा नाम्न्या नद्या सह मिलति तथा भागीरथ्याः नाम गङ्‌गा इति परिवर्तितं भवति। हिमा लयस्य उच्चशिखरेभ्यः तीव्रगत्या प्रवहमाना गङ्‌गा हरिद्वारे किंचित् मन्दतां याति। हरिद्वारतः प्र वहमाना एषा प्रयागे यमुनया सह मिलति तत् स्थाने जनैः पवित्रं संगमं इति कथ्यन्ते। जनैः मन्यन्ते अदृश्यां सरस्वती अपि अत्रैव मिलति। प्रयागतः वाराणसी पाटलीपुत्रप्रधाननगराणां प वित्रीकरणं कृत्वा अन्ते सा समुद्रे विलीयते।

१. एकपदेन उत्तरत
(क) का भारतस्य प्राणवाहिनी नदी?
(ख) भागीरथी अलकनन्दया सह कुत्र मिलति?
(ग) सरस्वती कीदृशी नदी भवति?
(घ) गंगा हिमालये कथं प्रवहमाना अस्ति?

२. पूर्णवाक्येन उत्तरत
(क) भागीरथी कथं गंगारूपे परिवर्तिता भवति?
(ख) जनैः किं मन्यन्ते?

३. निर्देशानुसारेण उत्तर
(क) 'मन्दतां' पदे कः प्रत्ययः??
(ख) 'अत्रैव' इति पदस्य सन्धिविच्छेदं कुरुत।

सज्जनाः यानि यानि सत्कार्याणि कुर्वन्ति, स सदाचारः उच्यते। नरः निम्नस्थान् सदाचार-नियमान् पगलयेत्। प्रातः काले उत्थाय मातापितरौ वृद्धान् गुरुन् च प्रणमेत्। तेषाम् आज्ञां पालयेत् तान् सेवेत च।एतेन मनुष्याणाम् आयुः विद्या यशः, बलं च एतानि चत्वारि वर्धन्ते। नरः कदापि असत्यं नवदेतं। परधनं न हरेत्। पापं न कुर्यात्। मूर्खैः सह मित्रतां न कुर्यात्। अपशब्दान् न वदेतं। स्वदेशाय धर्माय कुलाय च प्राणानपि त्यजेतं। समयानुसारं हितं मधुरं चावदेत्।

१. एकपदेन उत्तरत

(क) के सत्कार्याणि कुर्वन्ति?

(ख) कीदृशान् शब्दान् न वदेत्?

(ग) केषाम् आज्ञां पालयेत्?

(घ) कैः सह मित्रतां न कुर्यात्?

२. पूर्णवाक्येन उत्तरत

(क) मनुष्याणां कानि वर्धन्ते?

(ख) किमर्थं प्राणानपि त्यजेत्?

३. निर्देशानुसारेण उत्तरत

(क) 'समयानुसारम्' इति पदस्य सन्धिविच्छेदं कुरुत।

(ख) 'पालयेत्' अति पदे कः लकारः?

विद्या अज्ञनान्धकारं दूरीकरोति। ज्ञानेन मनुष्यस्य प्रतिष्ठा जायते। विद्वान् सर्वत्र पूज्यते। विदुषः जनस्य राज्ञा अपि सम्मानं भवति। विद्या जनस्य साहाय्यं करोति। केनापि कविना उक्तम् विद्या विनयं ददाति। अनेन तस्य सम्मानम् प्रतिष्ठा च वर्धते। एवं विद्याया अनेके लाभाः सन्ति। विद्या एव सुखमयं साधनम् अस्ति।

१. एकपदेन उत्तरत

(क) विद्या किं दूरीकरोति?

(ख) विदुषः जनस्य राज्ञा अपि किं भवति?

(ग) विद्यां प्राप्य मनुष्यः कीदृशः भवति?

(घ) विद्या कस्य साधनम्?

२. पूर्णवाक्येन उत्तरत

(क) विद्याविषये कविना किम् उक्तम्?

(ख) विद्यया किं किं भवति?

३. निर्देशानुसारेण उत्तरत

(क) 'प्राप्य' इति पदे कः उपसर्गः कश्च प्रत्ययः?

(ख) 'विदुषः' इति पदे का विभक्तिः?

मानवजीवनं चतुर्षु विभागेषु विभक्तम्। ते विभागाश्चत्वारः आश्रमाः अप्युच्यन्ते। चत वारः आश्रमाः ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यास-संज्ञकाः। पञ्चविंशति-वर्षपर्यन्तं कस्मिन् आश्रमे विश्रय चत्वारोऽपि आश्रमाः सेव्याः तत्रापि प्रथमाश्रमः ब्रह्मचर्याश्रमः सवैरपि मानवैः अपरिहार्यत वेन परिपालनीयः गृहस्थादित्रयः आश्रमास्तु ऐच्छिकाः। आश्रमाणां सर्वोत्कृष्टः ब्रह्मचर्याश्रमः मान वजीवनस्य आधारभूतः स एव मानकीं शारीरिकीं च शक्तिं विकासयति। अस्मिन्नाश्रमे ब्रह्मचारिणः हरुकुलाश्रमे निवसन्तः गुरोः सकाशात् विविधाः विद्याः विज्ञानानि च शिक्षन्ते निःशु ल्कम्।

१. एकपदेन उत्तरत

(क) मानवजीवनं कति विभागेषु विभक्तम्?

(ख) प्रथमम् आश्रमम् किम् अस्ति?

(ग) ब्रह्मचारिणः कुत्र शिक्षन्ते?

(घ) ब्रह्मचर्याश्रमः कस्य आधारभूत अस्ति?

२. पूर्णवाक्येन उत्तरत

(क) चत्वारः आश्रमाः के?

(ख) प्रथमः आश्रमः कथं परिपालनीयः?

३. निर्देशानुसारेण उत्तरत

(क) 'चत्वारो.पि' इति पदस्य सन्धिविच्छेदं कुरुत।

(ख) 'परिपालनीयः' इति पदे कः प्रत्ययः?

परनात्मना विचारशक्तिर्जगति केवलं मानवायैव दत्ता, तथैव विचारशक्तिशाली मनुष्यः कठिनात्कठिनतरमपि कार्यं कुर्वन् स्वस्य स्वदेशस्य च कीर्तिं तनोति, सुखं च लभते। दृश्यतां ता वत् बुद्धिप्रभावेणैव मनुजोऽद्य व्योम्नि चानायासेन पक्षी इव उड्डीयते, स्वराकेटास्त्रमपि चन्द्र लोकं प्रेषयति। अहो अद्य मानवमस्तिष्कमपि विज्ञानमयं जातम्। अतः सर्वैःविज्ञानयुगमिदं कथ्यते।

१. एकपदेन उत्तरत

(क) विचारशक्तिः केन दत्ता?

(ख) मनुष्य कस्य कीर्तिं तनेति?

(ग) मनुजः अद्य कुत्र उड्डीयते?

(घ) मानवमस्तिष्कं कीदृशं जातम्?

२. पूर्णवाक्येन उत्तरत

(क) विचारशक्तशाली मनुष्यः किं किं करोति?

(ख) बुद्धिप्रभावेण मनुष्यः किं कर्तुं शक्यते?

३. निर्देशानुसारेण उत्तरत

(क) 'विज्ञानयुगम्' इति पदस्य समासविग्रहं कुरुत।

(ख) 'बुद्धिप्रभावेणैव' इति पदस्य सन्धिविच्छेद कुरुत।

पुत्रस्य पापं दृष्ट्वा माता भित्तौ एकं कीलं स्थापयति। इदं दृष्ट्वा पुत्रः मातरं अपृच्छत्-त वम् किमर्थं कीलं स्थापयसि इति। माता-वत्स एतत् तव कर्माणि स्मारयति। तत् पश्चात् सः पुत्रः पुणयं कारियं कुर्तुम् आरभते। पुत्रस्य कुकर्म अनुसृत्य माता कीलं निवारयति। एवं प्र ाकारेण एकस्मिन् दिने एकं अपि कीलं भित्तौ नासीत्। तदा पुत्रः अतीव प्रसन्नः जातः तदा तस्य माता अवदत्-पुत्र कीलस्य स्थाने भित्तौ तत् चिह्नं स्थरं अस्ति। अर्थात्-पापकार्यस्य कलंकः स्थिरः तव नाम्ना सह एषः कलंकः अपि स्थिरः इति।

१. एकपदेन उत्तरत

(क) माता भित्तौ किं स्थापयति?

(ख) एतत् कान् स्मारयति?

(ग) एकस्मिन् दिने कीलं कुत्र नासीत्?

(घ) कस्य कलंक स्थिरः?

२. पूर्णवाक्येन उत्तरत

(क) प्रसन्नस्य पुत्रस्य वचनं श्रुत्वा माता किं उक्तवती?

(ख) माता किमर्थं कीलं स्थापयति?

३. निर्देशानुसारेण उत्तरत

(क) 'भित्तौ' इति पदे का विभक्तिः?

(ख) 'दृष्ट्वा' इति पदे कः प्रत्ययः?

श्रीमद्भागवत-पुराणे वर्णितमस्ति यत् राज्ञः पृथोः राज्ये अन्नस्य महती न्यूनता संजाता। वर्षायाः अभावकारणात् अन्नोत्पादनं अपि नाभवत्। तस्य प्रजा क्षुधया पीडिता भूत्वा शनैः-शनैः मृत्युं प्राप्नेति स्म। महाराज-पृथुना एतत् ज्ञातम् यत् एषः भूमेः दोषः अस्ति येन स्वोदरे अन्नादिकं समाहितम् अकरोत्। सः कुपितः अभवत् अथ च धनुषबाणं स्वीकृत्य भूमिं नाशयितुं उद्यतः अभवत्। पृथिवी महाराज-पृथुं उग्ररूपे दृष्ट्वा भयभीता जाता, गोस्वरूपं धारयित्वा अधावत्। महाराज-पृथुः तस्याः अनुधादनं करोति स्म। अन्ते गोरूपधरित्री पृथुः शरणे समागतवती। तस्मात् दिनात् एव जनाः पृथिवीं गोरूपे मन्यन्ते स्म।

१. एकपदेन उत्तरत

(क) कस्य राज्ये अन्नस्य न्यूननता संजाता?

(ख) अन्नादिकं कुत्र समाहितम् जातम्?

(ग) पृथुं उग्ररूपे दृष्ट्वा पृथिवी कीदृशी जाता?

(घ) जनाः पृथिवीं कस्मिन् रूपे मन्यन्ते?

२. पूर्णवाक्येन उत्तरत

(क) पृथिवी कथं अधावत्?

(ख) जना कथं मृत्युं प्राप्ताः?

३. निर्देशानुसारेण उत्तरत

(क) 'धारयित्वा' इति पदे कः प्रत्ययः?

(ख) 'क्षुधया' इति पदे मूलशब्दः कः ?

भारते धर्मस्य अतीव महत्वपूर्णं स्थानं अस्ति। सामान्यरूपेण यदा धर्मस्य चर्चा भवति तदा हिन्दू-मुस्लिम-सिख-ईसाईत्यादीनां अनुस्मरणं भवति। भारतीय-संस्कृतौ धर्मः जीवनमूल्यं अस्ति। सम्यक् आचरणम् एव वास्तविकः धर्मः अस्ति। 'आचरः परमो धर्मः' रूपी मान्यता तु प्रसिद्धा। एवं धर्मस्य अनेकासु मान्यतासु सर्वोत्तमं धर्मः कः अस्ति? अस्य प्रश्नस्य उत्तरम् महाभारते दत्तम अस्ति यत्- 'आत्मनः प्रतिकूलानि परेषां न समाचरेत्।' यदि कोऽपि मनुष्यः किमपि धार्मिकं अनुष्ठानं नसमाचरति तथा अन्येषां प्रति उत्तमं व्यवहारं करोति स एव जनाः धार्मिकः भवति।

१. एकपदेन उत्तरत

(क) भारते कस्य महत्वपूर्णं स्थानं भवति?

(ख) भारतीयसंस्कृतौ धर्मः कः अस्ति?

(ग) सम्यक् आचरणं किं अस्ति?

(घ) कस्य चर्चा भवति?

२. पूर्णवाक्येन उत्तरत

(क) महाभारते सर्वोत्तमः धर्मः किं वर्णितमस्ति?

(ख) कीदृशः जनः धार्मिकः भवति?

३. निर्देशानुसारेण उत्तरत

(क) 'आत्मनः' इति पदे का विभक्तः अस्ति?

(ख) 'धार्मिकः' इति पदे कः प्रत्ययः?

यथा परमाणुविषये आधुनिकसमय् ज्ञानं विद्यते तादृशी सूक्ष्मेक्षिका तु प्राचीनकाले न आसीत् परन्तु परमाणु-संरचना-विषये भारतीयानां सिद्धान्तः अतीव महत्वपूर्णः अस्ति। संसारे सर्वप्रथम-परमाणु-सिद्धान्त-प्रतिपादकः महर्षि कणादः आसीत्। स्वकीयवैशेषिक-दर्शने पृथिव्यादि भूतद्रव्यानां मूलस्वरूपं पारमाण्विकम् संस्थापितम्। तद्दृष्ट्या परमाणुः निरवयवः भवति। द्वयोः परमाण्वोः संघातः द्वयणुक इति कथ्यते। त्रयाणां द्वयणुकानां संघातः त्रसरेणु इति कथ्यते। त्रसरेणुः महत्परिणामयुक्तः प्रथमा स्थायी रचना भवति। वैशेषिक-दर्शने एवं प्रतिपादितम् अस्ति यत् कस्यापि वस्तुनः रासायनिकपरिवर्तने ऊष्मागतिकेः अनिवार्या आवश्यकता भवति। यदि कस्मिन्नपि वस्तुनि रासायनिकं परिवर्तनं भवति तदा तस्य वस्तुनः आणविकसंरचनापर्यन्त ि वखण्डनं भऊत्वा नूतनम् अणुसंयोजनं भवति। तत्कालीन-प्रगतिं वीक्ष्य एतत्- सिद्धान्तं अतीव ि वस्मयकरं प्रतीयते।

१. एकपदेन उत्तरत

(क) कस्मिन् विषये भारतीयानां सिद्धान्तः अतीव महत्वपूर्णः अस्ति?

(ख) भूतद्रव्यानां मूलस्वरूपम कीदृशं संस्थापितम्?

(ग) रासानिकपरिवर्तने कस्याः अनिवार्या आवश्यकता भवति?

(घ) एतत् सिद्धान्तं कीदृशं प्रतीयते?

२. पूर्णवाक्येन उत्तरत

(क) त्रसरेणोः निर्माणस्य का प्रक्रिया अस्ति?

(ख) रासायनिक-परिवर्तनस्य प्रक्रिया स्पष्टीकुरुत।

३. निर्देशानुसारेण उत्तरत

(क) 'द्वयणुकानां' इति पदे का विभक्तिः?

(ख) 'नूतन-अणुसंयोग' पदस्य समासविग्रहं कुरुत।?

(ग) 'वीक्ष्य' इति पदे कः प्रत्ययः?

(घ) 'पृथिव्यादि' पदस्य सन्धिविच्छेदं करुत।

४.        अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत।

मानवानाम् कस्यचिदपि कार्यस्य सम्पादने बुद्धरेव प्रधानभूतं साधनं विद्यते। अथ का नाम बुद्धि। बुद्धिः बोधनात्, यथा बलाद् विषया समवबोध्यन्ते ज्ञायन्ते सा बुद्धिः, बुध्यते अनेनेति व्युत्पत्तेः। बुद्धिर्हि ज्ञानात्मिका शक्तिविशेषा। बुद्धिमान् हि मानवो यस्मिन् कस्मिन्वापि विषये पदमाधते तस्मिन्नेव विषये स्वबुद्धिचमत्कारं प्रदर्शयति। सत्यमेतत्, किन्तु नायं सार्वत्रिको नियमः कस्मिंश्चिद् विषये निपुणतरोऽपि कश्चित् विषयान्तरे ज्ञानं प्रदर्शयति। कश्चित् छात्रः गणितर्वि वषये मन्दोऽपि भाषायां अतिमेधावी विलोक्यते। अतः व्यक्तिभेदात् बुद्धिभेदा अपि जायन्ते। स च बुद्धिभेदः कर्मानुबन्धो भवति। बुद्धयस्तावत् त्रिविधा दृश्यन्ते-बोधात्मिका, प्रेरणात्मिका, उभयात्मिकी च। तासु बोधात्मिका सामान्या, प्रेरणात्मिका च विशिष्टा, उभयात्मिका पुनः सवि वशेषा भवति। सविशेषबुद्धिमन्तो हि मानवाः विशिष्टाः महान्तश्च जायन्ते। त एव मेधाविनः इति पदेन व्यपदिश्यन्ते। प्रेरणात्मिका हि बुद्धिः सदा फलवती भवति। बुद्धिर्हि ज्ञापयति खलु यथार्थं तत्त्वम्।

१.        एकपदेन उत्तरत

(क) कस्य सम्पादने बुद्धिः साधनम् विद्यते?

(ख) कस्मिंश्चिद्विषये निपुणकरोऽपि किं प्रदर्शयति?

(ग) बुद्धयः कति विधाः दृश्यन्ते?

(घ) कीदृशी बुद्धिः सदैव फलवती भवति?

२.        पूर्णवाक्येन उत्तरत

(क) त्रिविधा बुद्धयः काः?

(ख) बुद्धेः का व्युत्पत्तिः।

३.        निर्देशानुसारेण उत्तरत

(क) 'प्रेरणात्मिकां' इति पदे कः लिङ्ग?

(ख) 'तस्मिन्नेव' पदस्य सन्धिविच्छेदं कुरुत।?

(ग) 'स्वबुद्धिचमत्कारं' इत्यस्य समासविग्रहं कुरुत।

(घ) 'समवबोध्यन्ते' इत्यत्र कः प्रत्ययः?

४.        अस्य गद्यांशस्य शीर्षकं लिखत।

अस्माकं देशः कृषिप्रधानदेशश्च अस्ति। सम्प्रति देशस्य सप्तति प्रतिशतजनाः कृषिमुपरि अवलम्बिताः सन्ति। यदा १९४७ तमे वर्षे देशः स्वतन्त्रः अभवत् तदा कृषकानां स्थितिः अतीव

शोचनीया आसीत्। भारतस्य कोटिशः जनाः अन्नस्य अल्पयोत्पादम- कारणात् क्षुधयया पीडिताः भूत्वा कालकवलीभूताः जाताः परं अस्माकं प्रधानमन्त्रिणः श्रीजवाहरलालनेहरूमहोदयस्य सत्प्र ायासेन बृहत् बन्धानां निर्माणं अभवत्। कुल्यादिद्वारा समस्तेषु देशेषु शस्यसेचनाय जलम् उपल ब्धं अभवत्। शनैः शनैः कृषिक्षेत्रे विकासः जाता। नेहरूमहोदनस्य अनन्तरं श्रीलाल बहादुरशास्त्री, श्रीमतीइन्दिरागाँधीमहोदयायाः च प्रयासेन प्रथम-हरित क्रान्ते सूत्रपातः अभवत्। अन्नोत्पादने देशः आत्मरिर्भरः जातः। ग्रामीण-अर्थव्यवस्थायाः विकासाय अद्यतनीयः सर्वकारः अपि नूतनदृष्टया प्रयतमानः अस्ति। अस्मात् कारणात् भारतदेशः न केवलं कृषि उत्पादने आत्मनिर्भरः अभवत् अथ च अन्नस्य विशालभण्डागाराः सुरक्षिताः सन्ति। अस्माकं सर्वेषां एतत् कर्तव्यमक्ति यत् कृषे विकासाय सततं प्रयासं कुर्मः।

१. एकपदेन उत्तरत
   (क) अस्माकं देशः कीदृशः अस्ति?
   (ख) कोटिशः जनाः कया पीडिता। जाताः ?
   (ग) कस्मिन् क्षेत्रे देशः आत्मनिर्भरः जातः ?
   (घ) नेहपूमहेदयस्य प्रयासेन केषां निर्माणम् अभवत्?

२. पूर्णवाक्येन उत्तरत
   (क) आधुनिकः सर्वकारः कुत्र प्रयतमानः अस्ति?
   (ख) सर्वेषां प्रयासेन देशः कीदृशः जातः?

३. निर्देशानुसारेण उत्तरत
   (क) 'शस्यसेचनान' इति पदस्य समास-विग्रह करुत।
   (ख) 'अन्नोत्पादने' इति पदस्य सन्धिविच्छेदं कुरुत।
   (ग) 'क्षुधया' इति पदे का विभक्तिः?
   (घ) 'कालकवलीभूतः' इति पदस्य को अर्थः ?

४. अधो गद्यांशस्य उपयुक्तं शीर्षक लिखत।

अस्माकं परितः यत् वातावरणम भवति तत् पर्यावरणम् इति कथ्यते। मनुष्य यस्मिन् परिवेशे निवसति जीवनस्य गुणवत्ता अपि तथैव निर्धारिता भवति। प्राचीन-भारतीय-परम्परायां पृथिवी, जलं, तेजः, वायुः, आकाशः इति पञ्च भूता मन्यन्ते। समस्तं जगत् निर्मितम् अस्ति। प्र ाणिनां शरीराणि अपि एतैः एव निर्मितानि भवति। एतेषां भतद्रव्याना उचित अनुपाते स्थितिः पर्यावरण-सन्तुलन इति भवति। मानवस्य जीवनशैल्यां समये-समये परिवर्तनं भवति, अनेन वस्तूनां उपयोगेऽपि परिवर्तनं जातम्। सम्प्रति मानवेन तीव्रः औद्येगिकः विकासः कृतः

औद्योगिकविकासेन सह उद्योगानां अपद्रव्यैः समस्तं वातावरणं दूषितं भवति। वायुप्रदूषणकारणात् अम्लीयवृष्टिः अपि भवति, अस्माकं नद्यः विषाक्ताः सन्ति। अधिकाधिकं अन्नोत्पादनाय उर्वरकाणां युक्तानां परमाण्विकानाम् अपशिष्टानां भयावहः दुष्प्रभावः अपि अद्य अनुभूयते। यदि एषा स्थितिः दीर्घकालं यावत् भविष्यति तदा मानवसभ्यतायाः अपि विनाशः भवतुं शक्यते। अतएव अस्माकं सर्वेषां एतत् कर्तव्यम् अस्ति यत् औद्योगिक-विकासेन साकं प्राकृतिक-पदार्थानां दुरुपयोगः मा भवतु।

१. एकपदेन उत्तरत

(क) प्राचीन-भारतीय-परम्परायां कति भूताः मन्यन्ते?

(ख) कस्य जीवनशैल्यां परिवर्तनं भवति ?

(ग) कैः समस्तं वातावरणं दूषितं भवति ?

(घ) पारमाण्विकानाम् अपशिष्टानां कीदृशः दुष्प्रभावः अनुभूयते?

२. पूर्णवाक्येन उत्तरत

(क) भूमिः कथं प्रदूषिता भवति?

(ख) असमाकं किं कर्तव्यमस्ति?

३. निर्देशानुसारेण उत्तरत

(क) 'अपद्रव्यैः' इति पदे का विभक्तिः?

(ख) 'विकिरणयुक्तानां' इति पदस्य समासविग्रहं कुरुत?

(ग) 'अन्नोत्पादनाय' इति पदस्य सन्धिविच्छेदं कुरुत।

(घ) 'गुणवत्ता' इति पदे कः प्रत्ययः ?

४. अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत।

## अपठित-गद्यांशः

## गद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत-

अस्माकं भारत देशः अतीव विशालः अस्ति। अत्र अनेके प्रदेशा सन्ति। सर्वेषु प्रदेशेषु सांस्कृतिक -वैविध्यं दृश्यते। सर्वेषां प्रदेशानां स्वकीया विशिष्टा भाषा भवति। तासु भाषासु पंजाबी, हिन्दी, मराठी, गुजराती, राजस्थानी, बंगाली असमी, उड़िया इत्यादि प्रमुखाः सन्ति। दक्षिण-भारतीय-भाषाया विकासः पृथक्तया अभवत्। उत्तरभारतीय समस्तानां भाषानां विकसः विविधप्राकृतरूपेभ्यः अभवत्। अतएव एताः समस्ताः भाषाः प्रत्यक्षतः संस्कृत- भाषातः एव ि

वकसिताः अभवन्। दक्षिण -भारतीय-भाषासु अपि संस्कृत-शब्दानां प्रधान्यं दृश्यते। प्राचीन कालादारभ्य भारतस्य यावत् सांस्कृतिक-विकासः जातः तत्सर्वं संस्कृतमाध्यमेनैव अवगन्तुं शक्यते। प्राचीनभारतस्य इतिहासः अपि संस्कृतभाषायामेव सन्निहितोऽस्ति। यदि कोपि जनः भारतं भारतीय संस्कृतिं च ज्ञातुमिच्छति तत्कृते संस्कृतस्य ज्ञानम् अपरिहार्यम् अस्ति। संस्कृत-साहित्ये विद्यमानाः वेदाः, पुराणोऽपि, उपनिषदः, शास्त्राणि भारतीयसभ्यताया : परिचायकाः सन्ति। संक्षेपतः वयं वक्तुं पारयामः यत् संस्कृत-भाषा भारतस्य प्राणभूता भाषा अस्ति। संस्कृत-भाषा एव भारतीयराष्ट्रिय एकतायाः सूत्रम् अस्ति।

१. एकपदेन उत्तरत-

(क) कः अतीव विशालः अस्ति?

(ख) दक्षिण-भारतीय- भाषाणां कथं विकासःअभवत्?

(ग) का राष्ट्रीय एकतायाःसूत्रम् अस्ति?

(घ) सर्वेषु प्रदेशेषु किं दृश्यते?

२. पूर्णवाक्येन उत्तरत-

(क) संस्कृत-साहित्ये विद्यमानाः प्रमुखाः ग्रन्थाः के?

(ख) उत्तर-भारतीय-भाषाणां विकासः कथं अभवत्?

३. निर्देशनुसारेण उत्तरत-

(क) ‘कोऽपि’ इति पदस्य सन्धिविच्छेदं कुरुत।

(ख) ‘ज्ञातुम्’ इत पदे कः प्रत्ययः ?

(ग) ‘सभ्यतायाः’ इति पदे का विभक्तिः?

(घ) ‘संस्कृतिवैविध्यं’ इति पदस्य समासविग्रहं कुरुत।

४. अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत।

एकदा एकः कर्त्तव्यपरायणः नगर-रक्षकः इतस्ततः भ्रमन् एकम् अशीतिवर्षीयं महापुरुषम् अपश्यत्। सः आम्रवृक्षस्य आरोपणे तल्लीनः आसीत्। इदं दृष्टवा नगररक्षकः तं महापुरुषम अवदत्-अवलोकेन प्रतीयते यत् यदा एषः वृक्षः फलिष्यति तदा भवान् जीवितः न भविष्यति। अतः किमर्थं वृथा परिश्रमं कुर्वन्ति भवन्तः? महापुरुषः हसित्वा अवदत् पश्यन्तु एतान् फलयुक्तान् वृक्षान्। एतेषाम् आरोपणं मया न कृतं परं फलानि अहं खादित्वा सन्तुष्टः भवामि। अतः यदा मम आरोपितस्य वृक्षस्य फलानि अन्ये खादिष्यन्ति, अहं पुनः प्रसन्नः भविष्यामि। महापुरुषस्य वचनं श्रत्वा तं च नमस्कृत्य नगररक्षकः उक्तवान्-अनुकरणीया एव सज्जनानां सज्जनता।

१.	एकपदेन उत्तरत
- (क) नगररक्षकः कं अपश्यत्?
- (ख) महापुरुषः किं कृत्वा अवदत् ?
- (ग) कस्य फलानि अन्ये खादिष्यन्ति ?
- (घ) कीदृशान् वृक्षान् पश्यन्तु?

२.	पूर्णवाक्येन उत्तरत
- (क) नगररक्षकस्य वचनं श्रुत्वा महापुरुषः किमवदत्?
- (ख) महापुरुषस्य वचनं श्रुत्वा नगररक्षकः किमुक्तवान्?

३.	निर्देशानुसारेण उत्तरत
- (क) 'कर्त्तव्यपरायणः' इति कस्य विशेषणम्?
- (ख) 'सन्तुष्टः' इति पदे कः प्रत्ययः?
- (ग) 'तल्लीनः' इति पदस्य सन्धिविच्छेदं कुरुत।
- (घ) 'मम' इति पदे कः प्रत्ययः ?

४.	अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत।

अस्माकं राष्ट्ध्वजः त्रिवर्णात्मकः अस्ति। अस्मिन् ध्वजे स्थिताः रागाः पारस्परिक-शोभां वर्धयन्ति ते शिक्षकयन्ति यूयम् भारतीयाः वयमिवान्योन्य शोभां वर्धयन्तः बंधुभावेनात्र वसत। यथात्र शुक्लं रागं नीलरक्तौ न रञ्जयत नीलरक्तं न मलिनयति, तथा अस्मास्वपि कश्चिता केनचित् सम्भूय वा एकाकी कञ्चनान्यं नाच्छादयेत् न बाधेत। सर्वेऽपि स्वस्य धर्मे स्थिराः सन्तो जीवेयुः।

अस्यैव त्रिरागस्य ध्वजस्य छायायाम् अस्माकं पूर्वजैस्तिलक-मालवीय-गांधि-प्रभृतिर्नेतृभिः सत्यम् अहिंसाञ्चवलम्ब्य स्वातन्त्र्यं प्राप्तम्। इयं स्वतन्त्रता अस्माभिः अगस्तमासस्य पञ्चदशतारिकायां सप्तचत्वारिंशोत्तर एकोनविंशतिशततमे वर्षे प्राप्ता। अस्मिन्नैव दिने अयम् राष्ट्रध्वजः विवृताकाशे स्वतन्त्रभारतस्य सर्प्रथमं तरंगितोऽभवत्। अस्माभिरस्य गौरवं प्र ाणपणेनापि सदा रक्षणीयम्।

१.	एकपदेन उत्तरत-
- (क) अस्माकं राष्ट्रध्वजः कीदृशः?
- (ख) रागाः कस्य शोभां वर्धयन्ति?
- (ग) किं प्राणेनापि सदा रक्षणीयम्?
- (घ) के धर्मे स्थिराः सन्तो जीवेयुः?

२.	पूर्णवाक्येन उत्तरत-

(क)	अस्माकं पूर्वजैः कथं स्वातन्त्र्यं प्राप्तम्?

(ख)	अस्माकं देशः कदा स्वतन्त्रः अभवत्?

३.	निर्देशानुसारेण उत्तरत-

(क)	'नेतृभिः' इति पदे का विभक्ति?

(ख)	'राष्ट्रध्वजः' शब्दस्य समासविग्रहम् कुरुत?

(ग)	'तरंगितोऽभवत्' इति पदस्य सन्धिविच्छेदं कुरुत?

(घ)	'रक्षणीयम्' इति पदे कः प्रत्ययः?

४.	अस्य गद्यांशस्य उपयुक्तं शीर्षक लिखत।

उपनिषद ग्रन्थाः आध्यात्मविद्याप्रधानाः सन्ति। तासु संवादरूपेण आख्यानरूपेण च वि विधाः विद्या समुपदिष्टाः। परं तासु तात्पर्य- विषयीभूतोऽर्थः आत्मानमधिकृत्यैव प्रस्तुतः। उपनिषत्साहित्यमेव सर्वेषां सम्प्रदायां मूलभित्तिरिति मन्यामहे। उपनिषत्साहित्यमतीव शान्तिप्रदं ज्ञानप्रकाशं वर्तते, तदेव च मानवसस्कतेरादि जननी। विश्वतत्त्वज्ञानस्य आदिमं स्त्रोतोऽपि उपनिषत् महानदीव प्रवाहितमिति नात्र संदेहः। ब्रह्मविद्या हि मनसः आत्मनश्च निरतिशयशान्तिप्रदा।
तथा हि-

**उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधयत।**

उपनिषदां वचनामेतत् सुधीभ्यो मुमुक्षुभ्यः प्रेरणाप्रदं निरतिशयशान्तिप्रदं चेति दिक्। उपनिषदां दार्शनिकमहत्वं न केवलं भारते अपितु समस्ते विश्वे उपनिषद्-सिद्धान्तानां प्र चारः प्रसारः अभवत्। अस्य प्रमुखा विशेषता अस्ति उपनिषदां नैसर्गिकः सिद्धान्तः। अस्मात् कारणात् एव उपनिषदः एतावत् लोकप्रियाः अभवन्।

१.	एकपदेन उत्तरत-

(क)	के आध्यात्मविद्या प्रधानाः सन्ति?

(ख)	उपनिषत्साहित्यं केषां मूलभित्तिः?

(ग)	उपनिषत् कस्य आदिमं स्त्रोतोऽस्ति?

(घ)	उपनिषद् कथं शान्तिप्रदं भवति?

२.	पूर्णवाक्येन उत्तरत-

(क) उपनिषद्भि कः सन्देशः प्रदत्तः?

(ख) उपनिषत्साहित्यं कीदृशं अस्ति?

३.	निर्देशानुसारेण उत्तरत-

(क) महत्त्वम् इति पदे कः प्रत्ययः?

(ख) चेति पदस्य सन्धिविच्छेदं कुरुत?

(ग) आत्मनः इति पदे का विभक्ति?

(घ) ब्रह्मविद्या इति पदस्य समासविग्रहं कुरुत?

४.	अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत।

मानवसभ्यतायाः प्रारम्भतः एव स्त्रीणां समाजस्य निर्माणे महत्वपूर्णं योगदानं अस्ति। कस्यापि समाजस्य स्थितिः स्त्रीणां स्थितिद्वारा एव निर्धार्येते। ऋग्वेदकालीनः समाजः आर्थिक-राजनैतिक-समाजिकदृष्ट्या समृद्धः कथ्यते। तस्मिन् समये समाजे स्त्रीणां गौर वपूर्णं स्थानं भवति स्म। ऋग्वेदे द्वादशानां ऋषिकाणां उल्लेखः विद्यते। उपनिषद्वाङ्मये गार्गी, मैत्रेयी इक्ष्यादीनां विदुषीणां नाम को न जानाति। अष्ट् शताब्दयां मण्डनमिश्रमहोदयस्य धर्मपत्नी भारती तथा विदुषी आसीत् यस्याः वैदुष्येन जगद्गुरुः शङ्करः अपि अतीव विस्मितः अभवत्। प्राचीनकाले मंदालसा नाम्नी महाराज्ञी आसीत् येन स्वकीयशिक्षया सप्त पुत्रान् ऋषिं अकारयत् एवं च अष्टमं पुत्रं नृपैंत अकारयत्। अत एव उक्तं अस्ति यत् माता निर्मात्री भवति। माता तदैव निर्मात्री भवितुं शक्यते यदा सा सम्यकृतया शिक्षिता भवति। समाजस्य राष्ट्रस्य च निर्माणे स्त्रीशिक्षायाः अतीव महत वपूर्ण स्थानं भवति। यथा बालकानां शिक्षा महत्वपूर्णाः अस्ति ततोऽपि अधिकतरा महत वपूर्णा बालिकानां शिक्षा भवति।

१.	एकपदेन उत्तरत-

(क) स्त्रीणां कुत्र योगदानं अस्ति?

(ख) तस्मिन् समये केषां गौरवपूर्णस्थानं भवति स्म?

(ग) मण्डनमिश्रस्य धर्मपत्नी का आसीत्?

(घ) का निर्मात्री भवितुं शक्यते?

२.	पूर्णवाक्येन उत्तरत-

(क) ऋग्वेदकालीनः समाजः कीदृशः आसीत्?

(ख) मंदालसा कथं स्वपुत्रान् ऋषिं नृपैंत च अकारयत्?

३. निर्देशानुसारेण उत्तरत-

(क) 'अकारयत्' इति पदे कः लकारः?

(ख) 'सामाजिकदृष्ट्या' इति पदे का विभक्ति?

(ग) 'ततोऽपि' इति पदस्य सनधिविच्छेदं कुरुत?

(घ) 'स्त्रीशिक्षायाः' इति पदे का विभक्तिः?

प्रजायाः शासनं, प्रजया शासनम्, प्रजायै वा शासनं प्रजातन्त्रम् इत्युच्यते। प्रजातन्त्रशासने खलु वस्तुतः प्रजैव राजा भवति, अतः प्रजातन्त्रसंविधानमपि प्रजायाः संविधानं सम्पद्यते। प्रजया निर्वाचिताः प्रतिनिधयः प्रजातन्त्रशासने एधिकारिणो भवन्ति। तत्र प्रजा स्वमताधिकारेण लोकसभाराजसभा प्रभृतिसंसदां निर्माणं करोति। अखिलमपि च शासन-निर्वहण-यन्त्रं स्वयमेव रचयति। प्रजैव प्रत्यक्षाप्रत्यक्षरूपरिर्वाचनपद्धत्या प्रतिनिधिसरण्या शासनचक्रं सृजति संगृह्णाति च। योग्या प्रजा सर्वागसुन्दरशासनं शासन-विधानं च निर्मिभाते अयोग्या चायोग्यम्। पाश्चात्य-ि वशारदा अपि प्रशासनं प्रजया वा प्रशासनं प्रजाशासनमिति वदन्ति। 'यथा राजा तथा प्रजा' इत्यासीत् प्राचां प्रवादः। परं प्रजातन्त्रे स् अव न्यायः विपर्थासं भजते। 'इदानीं' तु यथा प्रजा तथा राजा इत्येवोतितं प्रतिभाति। प्रजातन्त्रशासनस्य तदैव साफल्यं भवति शक्नोति यदा प्रजाः सुशिक्षिताः शिष्टाः, धर्मपरायणाः, कर्त्तव्यनिष्ठिताः, परोपकारव्रताः, नीतिनिपुणास्च स्युः नान्यथा।

१. एकपदेन उत्तरत

(क) प्रजायाः शासनं किं उच्यते?

(ख) कया निर्वाचिताः प्रतिनिधयः अधिकारिणो भवन्ति?

(ग) प्रजा प्रतिनिधिसरण्यया किं संसृजति?

(घ) योग्या प्रजा, कीदृशं विधानं निर्मिमीते?

२. पूर्णवाक्येन उत्तरत-

(क) पाश्चात्यविशारदाः प्रजातन्त्रस्य किं लक्षणम् विदन्ति?

(ख) प्रजानन्त्र-साफल्यं कदा भवितुं शक्यते?

३. निर्देशानुसारेण उत्तरत-

(क) इत्यासीत् इति पदस्य सन्धिविच्छेदं कुरुत।

(ख) प्रजाशासनम् इति पदस्य समासविग्रहं कुरुत।

(ग) प्रतिनिधिसरण्या इति पदे का विभक्तिः?

(घ) 'चायोग्यम्' इति पदस्य सन्धिविच्छेदं कुरुत?

४. अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत।

# रचनात्मकं कार्यम्

## रचनात्मकं कार्यम् - २०

| | |
|---|---|
| पत्रलेखनम् | ०५ |
| संवाद लेखनम् | ०५ |
| चित्राधारितवर्ण | ०५ |

# रचनात्मकं कार्यम्

## पत्रलेखनम्

१. अध्ययनोपेक्षा वशात् कनिष्ठभ्रातरं प्रति पत्रम्

५, आनन्दपुरम्<br>
(i) --------------<br>
तिथिः ३०.१.२००६

प्रिय अनुज,

सप्रेम (i i) --------------------- ।

अत्र (i i i) ------------------- तत्रास्तु। अद्य तव विद्यालयात् तव (iv) ------------- प्राप्तम्। एतत् ज्ञात्वा अतीव (v) ------------ जातम् यत् त्वया दिसम्बर-परीक्षायां प्रायेण सर्वेषु (vi) ------------------ हीनाः अंकाः प्राप्ताः। त्वं तृतीयायां श्रेण्यां पतितोऽ सि। मन्ये क्रीड़ासु तव (vii) ----------------- अधिका वर्तते। परम् अध्ययनस्य उपेक्षां कत्वा क्रीडनं न कदापि (viii) ---------------------- अस्ति।

पठनस्य समये (ix) -------------------- खेलनस्य समये खेलनम् एव उचिततरम् अस्ति। आशासे अध्ययनविषयिकीम् उपेक्षां (x) ------------------------ वार्षिक्यां परीक्षायां त्वम् उत्तमां श्रेणीं प्राप्स्यसि।

भवदीयो भ्राता,<br>
रामदत्तः

शब्दसूची - उत्तमम्, परित्यज्य, विषयेषु, आशीष, प्रगतिपत्र, दुःखम्, रुचिः, कुशलम्, पठनम्, सहारनपुरम्।

२. परीक्षासाफल्यात् मित्राय वर्धापनपत्रम्

परीक्षाभवनात्

तिथिः (i) -----------------

(i i) ------------------------।

(i i i) ---------------------- ।

तव परीक्षासफलतापत्रम् अद्य एव (iv) --------------------। तव सफलतां ज्ञात्वा माम् अति (v) ------------------- अस्ति। अहोरात्रं परिक्षमं कृत्वा भवान् ९५ प्रतिशतम् (vi) ------------------- लब्धवान्। त्वं मम -------------------- पारिवारिकजनस्य च (vii) ------------------- अर्हसि। पत्रस्य अन्ते पुनरपि वर्धापनं (viii) ----------------।

(ix) -------------------- सादंर नमोनमः।

भा

वदीयं (x)---------------

क, ख, ग।

शब्दसूची- पितृभ्याम्, अङकान्, सन्तोषः, ६.१०.२००७, कामये, साधुवादान्, प्राप्तम्, प्रियमित्र, सप्रेमनमस्कारम्, मित्रम्।

३. पित्रे परीक्षापरिणाम सुचकं पत्रम्

परीक्षाभवनम्

तिथिः १६.७.२००७

(i) ---------------------- पितृचरणाः,

सादरं (i i) -----------------------

अत्र (i i i) -------------- तत्रास्तु। भवान एतत् ------------------- ज्ञात्वा (iv) ---------------- भविष्यति यत् अहं परीक्षायाम् न केवलं प्रथम श्रेण्याम् (v) ------------- अभवम् (vi) ---------------- प्रथमस्थानं लब्धवान्। मत्कृते विशिष्टा छात्र वृत्तिः (vii) ---------------------। समाचारपत्रेषु मम (viii) ------------------ अपि प्र ाकाशितम्, इदं सर्वं भवतोः मातापित्रोः (ix) ----------------------- एव सञ्जातम्।

पूज्यमातृचरणयोः मम (x) ------------------------------।

भावदीयः पुत्रः,

क, ख, ग।

शब्दसूची- कुशलम्, उत्तीर्णः, आनन्दितः, पूज्याः, प्रणामम्, प्रदास्यते, आशीषेण, प्रणामाः, चित्रम्, अपितु।

४. भवतः नाम सुरेशः अस्ति। भवान् स्वमित्रम् राहुलं स्व भगिन्याः विवाहे निमन्त्रणम् दातुम् इच्छति। मञ्जुषायाः उचितपदैः पूरयतः-

उ देवरारणिः
जयपुरतः
तिथिः -------------------

(i) ---------------- राहुल!
(i i) ------------------ नमोनमः।

अत्र कुशलं तत्रास्तु कामये।
इदं (i i i) ------------- वृत्तं भवन्तं सूचयित्वा अहम् आनन्दम् अनुभवामि यत मम (iv)---------------- विवाहः अग्रिमासस्य दशम्यां (v) ---------------- बुधावासरे, निश्चितः जातः । वरयात्रा लक्ष्मणपुरात् (vi)----------------। अहं त्वां प्रेमपूर्वकं पूर्वतः ए वं ज्ञापयामि येन क्ष्वां अत्र (vii) ---------------- पूर्वतः एव प्राप्तः स्यः। भवता पितृभ्या सह अत्र अवश्यमेव (viii) ---------------- । भावतां स्निग्धा सङ्गतिः साहाय्यं च अहं कामये (ix) ------------------------ ।

पितृभ्यां सस्वेहं नमोनमः। त्व पत्रोत्तरं प्रतीक्षमाणः।

भवतः प्रियमित्रम्
सुरेश :।

श्री राहुल चौरसिया
३३आनन्दलोकः
(x) -------------------------

मञ्जूषा - सुहृद, सप्रेम, तारिकायां, आगन्तव्यम्, भागिन्याः प्रीतिदायकं, आदरणीयाभ्यां, त्रिचतुर्दिनानि,। आगामिष्यति, जोधपुरनगरम्।

५. भवतः नाम दिनेशः अस्ति। तव मित्रं राकेशः दिल्ली नगरे वसति। स्वविद्यालयस्य वर्णनम् कुर्वन् मित्रं प्रति लिखितम् इदं पत्रं मञ्जूषायां दत्तैः उचितपदैः पूरयत-

केन्द्रीय विद्यालयः
कामरूपतः
तिथिः ---------------

प्रिय (i) ------------------------

सस्नेहं (i i)-------------------------

अत्र (i i i) ---------------- तत्रास्तु। अहम् अधुना स्वविद्यालयस्य वर्णनं कर्तुम् इच्छामि। मम (iv) ------------------ अतीव शोभनः अस्ति। अस्माकम् सर्वे (v) ------------------ दत्तचित्तेन पाठयन्ति। तेषां योग्यता वस्तुतः (vi) ------------------। स र्वे छात्राः अपि (vii) ------------------ सन्ति। विस्तरेण पुनः (viii) ------------------।

भवनः (ix)-----------------
दिनेश :

श्रीराकेश कुमार
१४, वर्सेत विहार
(x) -----------------------

मञ्जुषा- राकेश, योग्याः, नमस्ते, अध्यापकाः, कुशलं, विद्यालयः, प्रशंसनीया, मित्रम्, लेखिष्यामि, नव दल्लीनगरम्।

६. भवतः नाम कौशिकः अस्ति छात्रावासे च भवान् वसति। भवतः वार्षिक परीक्षा समाप्ता। परीक्षाविषयकं जिज्ञासां रामयितुम् पितरं प्रति लिखिते पत्रे मञ्जूषातः उचितपदान् विचित्य रिक्तस्थानानि पूरयत।

माडलविद्यालय छात्रावास
(i) -----------------------
तिथि : ----------------------

पूज्य (ii) -----------------------------
(iii) -----------------------------

अद्यैव मया भवदीयं (iv) ------------------ प्राप्तम्। भवतः मम (v) ------------------- अतीव जिज्ञासा प्रतीयते। निरंतरम् अभ्यासेन सर्वेषाम् प्रश्नपत्राणाम् उत्तराणि सम्यक् रुपेण दत्तानि। (vi) ----------------- आशीर्वादेन न केवलं प्रथम श्रेण्याम् (vii) ------------- भविष्यामि, (viii) ---------------- अपि प्रथमं (ix) ---------------- लप्स्ये।

मातृचरणयोः सादरं नमस्कारम्।

(x) ------------ पुत्रः
कौशिक।

मञ्जूषा- पत्रम्, सफलः, पितृमहोदय!, स्थानम्, कक्षायाम्, सादरं प्रणामाः, भवदाज्ञाकारी, परीक्षाविषये, भवताम्, दिल्लीतः

७. मित्रं प्रति लिखितं निम्नलिखितं पत्रम् मञ्जूषायां प्रदत्तैः उचितैः शब्दैः पूरयत-

(i) -----------------------------

प्रिय मित्र दिवाकर,

(ii) -------------------------- नमस्ते।

(iii) ---------------------- अहं मित्रैः सह जन्तुशालां द्रष्टुम् काननवनम् अगच्छम्। तत्र (iv) -------------------- अनेकान् पशून् अपश्याम। सर्वे पशवः इतस्ततः भ्रमन्ति स्म। सिंहा उच्चैः अगर्जन्। मयूराः नृत्ये (v) ------------------- आसन्। वस्तुतः मयूरं (vi) ------------------ कुत्र जन्तुशालायाः भव्यशोभा? तत्र आम्रवृक्षाः अपि आसन्, कोकिला (vii) -----------------। वस्तुतः यत्र आम्रवृक्षाः (viii) ------------- कोकिला तु भविष्यति एव। अग्रे पुनः लेखिष्यामि। (ix) ---------------- मम नमस्कारः कथनीयः।

भवदीयम् (x) -----------------
शेखरः।

मञ्जूषा- विना, तत्र, अभिन्नमित्रम्, वयम्, सस्नेहं, चेन्नईतः, श्वः, मग्नाः, अपि सर्वेभ्यः।

# उत्तराणि

१. (i) सहारनपुरम्, (ii) आशीष, (iii) कुशलम्, (iv) तव, (v) दुःखम्, (vi) विषयेषु, (vii) रुचिः, (viii) उत्तमम्, (ix) पठनम् (x) परित्यज्य।

२. (i) ६.१०.२००७, (ii) प्रियमित्र, (iii) सप्रेमनमस्कारम्, (iv) प्राप्तम्, (v) सन्तोषः, (vi) अङ्कान्, (vii) साधुवादान्, (viii) कामये, (ix) पितृभ्याम्, (x) मित्रम्।

३. (i) पूज्याः, (ii) प्रणामम्, (iii) कुशलम्, (iv) आनन्दितः, (v) उत्तीर्णः, (vi) अपितु, (vii) प्रदास्यते, (viii) चित्रम्, (ix) आशीषेण, (x) प्रणामाः।

४. (i) सुहृद्, (ii) सप्रेम, (iii) प्रीतिदायकं, (iv) भगिन्याः, (v) तारिकायां, (vi) आगन्तव्यम्, (vii) त्रिचतुर्दिनानि, (viii) आगमिष्यति, (ix) आदरणीयाभ्यां, (x) जोधपुरनगरम्।

५. (i) राकेश, (ii) नमस्ते, (iii) कुशलं, (iv) विद्यालयः, (v) अध्यापकाः, (vi) प्र ाशंसनीया, (vii) योग्याः, (viii) लेखिष्यामि, (ix) मित्रम्, (x) नव दिल्ली नगरम्।

६. (i) दिल्लीतः, (ii) पितृमहोदय, (iii) सादरं प्रणामाः, (iv) पत्रम्, (v) परीक्षा-विषये, (vi) भवताम्, (vii) सफलः, (viii) कक्षायाम्, (ix) स्थानं, (x) भवदाज्ञाकारी।

७. (i) चेन्नईतः, (ii) सस्नेहं, (iii) श्वः, (iv) वयम्, (v) मग्नाः, (vi) विना, (vii) अपि, (viii) तत्र, (ix) सर्वेभ्यः, (x) अभिन्नमित्रम्।

# रचनात्मकं कार्यम्

**सङ्केताधारितम् संवाद लेखनम्**

१।     अधोलिखित वार्तालापे आगतानि रिक्तस्थानानि पूरयत-

रमेशः -- मालति! किम् अतिथयः भोजनं कुर्वन्ति?
मालती -- आम् भ्रातः! अतिथिभिः भोजनं (i).......।
रमेशः -- मालति! किम् जनकः अपि तत्र उपविशति?
मालती-- भ्रातः! (ii)............तत्र न उपविश्यते।
सुरेशः-- मालति! किं माता फलानि आनीयन्ते।
मालती-- आम्! मात्रा (iii)............ आनीयन्ते।

२।     अधोलिखित वसन्त ऋतु विषयक संवादस्य रिक्तस्थान पूर्तिकुरुत---
राकेशः-- मोहन अधुना कः ऋतुः अस्ति?
मोहनः-- मित्र! साम्प्रतम् .......... अस्ति।
राकेशः-- गोपाल! वसन्तर्तौ कीदृशं वातावरणं भवति
गोपालः-- राकेश! वसन्तर्तौ नाधिकं ..... नचाधिका उष्णता भवति।
राकेशः-- गोपाल! वसन्तर्तौ पूर्ववर्ती ऋतुः.....आसीत्?
मोहनः-- मित्र! वसन्तर्तौ पूर्ववर्ती ऋतुः.....आसीत्।
राकेशः-- शोभनम्! गोपाल त्वं वद, वसन्तर्तोः ...कः ऋतुः भविष्यति?
गोपालः-- मित्र! वसन्तर्तोः पश्चात् ग्रीष्मर्तुः भविष्यति।

३।     मञ्जूषातः समुचितपदानि चित्वा वार्तालापं पूरयत ---
चेतनः-- वयं सायङ्कालेकन्याकुमारीं प्राप्स्यामः प्रथमं सागर तटे गत्वा ......
द्रक्ष्यामः। अनन्तरं मन्दिरे गत्वा .... दर्शनं करिष्यामः।
रमाः -- वयंकुत्र ..........?
चेतन -- ..............प्रवासिमन्दिरम् आस्ति। .....निवत्स्यामः।
पिता -- ........... कथम्?
चेतनः -- तत्र अनेके भोजनालयाः सन्ति। तत्र गत्वा भोजनं करिष्यामः।
पिता -- अथवा प्रथमम् एव खाद्यानि क्रेष्यामः। तानि ..... नेष्यामः। तत्र ......।
चेतनः -- रात्रौ तत्रैव ...... प्रातः .......।

| |
|---|
| मञ्जूषा - तत्र। प्रत्यागमिष्यामः। भोजनव्यवस्था। सूर्यास्तं। दैवालयसमीपे। देव्याः। प्र वासिमन्तिरम्। खादिष्यामः स्थित्वा। निवत्स्यामः |

४। मञ्जूषातः- उचित पदानि चित्वा रिक्त स्थानानि पूरयत-

मञ्जूषा -- विना, गातुम्, इच्छन्ति, वयं, महोदयः परन्तु, यदि, शोभनम् आवश्यकता, वाद्ययन्त्राणि।

अध्यापकः छात्राः! किं भवन्तः किञ्चित् प्रष्टुम् .....?
छात्राः महोदय! ... तु गातुम् इच्छामः।

अध्यापकः गातुम् इच्छन्ति! .... अहं तु .... न समर्थः।
छात्राः ........! वयं गास्यामः। समूहगानम्। ... भवान अपि।
अध्यापकः ........। अहम अपि गास्यामि। गीतं किम् अस्ति?
किं वाद्यन्त्राणाम् अपि ..... अस्ति।
छात्राः ..... यदि सन्ति, शोभनम्। अन्यथा एतानि .... एव गातुंशक्यते।
अध्यापकः एवम् अस्ति तर्हि गायामः।

५। मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत-
मञ्जूषा - शोभनम्, गच्छामि, ह्यः, जनकः, प्रतिश्यायेन अधुना, इदानीम्, श्वः, रमे, पीडितः

रमा- त्वं .... विद्यालयं कथं न आगच्छः
सीता- ह्यः मम .... अस्वस्थः आसीत।
रमा- तव जनकः केन रोगेण .... आसीत्?
सीता- सः .... पीड़ितः आसीत्।
रमा- .......सः स्वस्थः अस्ति।
सीता- ! किं त्वंश्वः विद्यालयम् आगमष्यसि?
रमा- अहं ..... अवश्यं विद्यालयम् आगमिष्यामि?
सीता- .........अहम्।
रमा- ........पुनः अपि शीघ्रम् आगच्छ।

# चित्राधारित, अभ्यास प्रशनाः

१। चित्रं दृष्ट्वा मञ्जूषातः पदानि अवचित्य रिक्तस्थानानि पूरयत-



१। अस्मिन् चित्रे एकः (i) ..................परिवारः वर्णितः।

२। (ii) .................पुस्तकानि सन्ति।

३। प्रकोष्ठे मञ्चस्य (iii) ............समाचारपत्रम् अस्ति।

४। एका बालिका स्वपुस्तकानि (iv) ................स्थापयति।

५। माता स्वसन्ततिं कार्यरतां दृष्ट्वा (v).............।

| मञ्जूषा |
|---|
| प्रसीदति, दत्तचित्तः, आदर्शः, पितुः, चरणस्पर्शम्, कापटिकायाम्, उपरि। |

२. अधोदत्तं चित्रं पश्यत। शब्दसूचीसहायतया चित्रम् आधृत्य संस्कृतेन पञ्चवाक्यानि उत्तरपुस्तिकायां लिखत-



शब्दसूची-सहायतार्थम्

नदी, वृक्षाः, रजकः, बालौ, क्षालयति, वस्त्राणि, तरतः, शुष्यन्ति, शिलापट्टके, पर्वतः, रमणीयः, कुटीरः।

३. इदं चित्रं पश्यत। तत् आधारीकृत्य शब्दसूची सहायतया संस्कृतेन पञ्चवाक्यानि लिखत



शब्दसूची

हंसौ, सरोवरः, जनाः, तूष्णीम् अपतत्, रक्षार्थम्, कच्छपः, नयतम्, अवदत्,

अनश्यत्, काष्ठखण्ड्म, धृत्वा।

४. चित्रं दृष्ट्वा मञ्चूषातः पदानि चित्वा पञ्चवाक्यानि संस्कृते लिखत-



| मञ्जूषा |
|---|
| उपवनम्, वृद्धः, यष्टिका, पादपाः, वृक्षाः, पुष्पाणि, बालाः, कन्दुकः, महिला, रोपणीया |

५. चित्रं दृष्ट्वा शब्दसूचीं च अधिकृत्य संस्कृते पञ्चवाक्यानि लेखनीयानि।



| मञ्जूषा |
|---|
| |

आपणस्य, आपणकः, टोपिका, एका, चत्वारः, फलानि, व्यञ्जनानि, क्रीणाति, बालिका।

६.



शब्दसूची
उद्यानस्य, बालकः, बालिका, वृक्षाः, पादपाः, खगः, वर्तकः, सरोवरः, शान्तिदायकम्, शुद्धं भवति।

७. इदं चित्रं पश्यत। चित्रम् आधृत्य शब्दसूचीसहायतया संस्कृतेन पञ्चवाक्यानि लिखत।



शब्दसूची
छात्राः, शिक्षकाः, पुस्तकालयः, तरण-सरोवरः, अनुशासनम्, क्रीडाक्षेत्रम्, पठन्ति,

विद्यालयः, पुस्कानि, अभ्यासः, दण्डः, पादकन्दुकक्रीड़ा, पाठयन्ति।

८. इदं चित्रं पश्यत। चित्रम् आधृत्य शब्दसूची-सहायतया च संस्कृते पञ्चवाक्यानि लिखत-



शब्दसूची
वृक्षाः, खगाः, मेघैः, कृषकः, वर्षाकालः, गगनं, महिलाः, कर्षति, अन्नानि, उड्डयन्ते, आनयन्ति, आच्छादितम्।

९. अधोदत्तं चित्रं ध्यानेन पश्यत। चित्रम् आधृत्य शब्दसूची-सहायतया संस्कृतेन पञ्च वाक्यानि उत्तर पुस्तिकायां लिखत।



शब्दसूची
क्षालयन्ति, नदी, मलिनं, पीत्वा, तिस्रः, विषाक्तानि, प्रदूषिता, विलीयन्ते, जलम्, अवकरम्, वस्त्राणि, क्षिपति, पुरुषः।

१०.    चित्रं दृष्ट्वा मञ्जूषातः पदानि अवचित्य संस्कृते पञ्चवाक्यानि लिखत।



मञ्जूषा
गृहस्य, महिमा, दूरदर्शनम्, प्रसन्नम्, हस्तौ, सुसज्जितः, पुरुषः, माता-पिता, काष्ठफलकदीपः, विद्यते, अस्ति।

११.



शब्दसूची

